# आचार्यद्वितीयवर्षम्
# तृतीयपत्रम्– नव्यन्यायः
# शैक्षिकनिष्पत्तिः

## ग्रन्थः – न्यायकौस्तुभः

**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

- ❖"सविकल्पकं न प्रत्यक्षम्" इति भाट्टमतस्य परिशीलनं, त्रिपुटीप्रत्यक्षवादिगुरुमतस्य परिशीलनम्, ज्ञानस्य पदप्रकारकता समर्थनं, निर्विकल्पकस्य द्वैविध्यं, विशेषणोपलक्षणभेदेन सविकल्पकद्वैविध्यम् च ज्ञातुं शक्नुवन्ति।

- ❖विशेषणोपलक्षणयोः भेदप्रदर्शकं मणिकारमतं, नवीनमतं, इतरमतत्रयं, सविकल्पके संज्ञामानोपपादनं, वैयाकरणमतानुसारं निर्विकल्पके संज्ञामानोपपादनम्, तत्परिशीलनं चावगन्तुं शक्नुवन्ति।

- ❖विशिष्टवैशिष्ट्यबुद्धेः चातुर्विध्यं, विशिष्टवैशिष्ट्यविषयतानिर्वचने नवीनानाम् अन्येषां च मतं च विज्ञातुं शक्नुवन्ति।

- ❖संशयत्वस्य साङ्कर्येण जातित्वनिरासं, संशयस्यानुगताननुगतलक्षणे, प्रतिबन्धकताघटितलक्षणं संशयसमुच्चययोः वैलक्षण्यप्रतिपादनं, चावगन्तुं शक्नुवन्ति।

- ❖विषयतायाः स्वरूपसम्बन्धरूपत्वोपपादनं विषयतायाः अतिरिक्ततावादिनवीनमतं, प्रकारता-विशेष्यता-संसर्गतानां विषयतात्वसाधनं, विषयतायाः निरूप्यनिरूपकभावापन्नानापन्नभेदेन द्वैविध्यं, पुनः विषयतायाः चातुर्विध्यं, ज्ञानसमानकालिकत्वं, उद्देश्यताविधेयतयोः स्वरूपं, लौकिकविषयतास्वरूपं, प्रवृत्तिविषयतात्रैविध्यं च ज्ञातुं शक्नुवन्ति।

**********